# Savitrikritam Yama Ashtakam

# સાવિત્રીકૃતં યમાષ્ટકમ્

## Document Information

Text title : Savitrikritam Yama Ashtakam

File name : sAvitrIkRRitaMyamAShTakam.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, aShTaka

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 370/12-22||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

Savitrikritam Yama Ashtakam

# સાવિત્રીકૃતં યમાષ્ટકમ્

ઇત્યુક્તા સા તુ સાવિત્રી યમં ભક્તવરં પરમ્ ।
જ્ઞાત્વા યમાષ્ટકં પ્રાહ શ ૃણુ લક્ષ્મિ! વદામિ તે ॥ ૧૨॥

સૂર્યનારાયણસ્તીર્થે પુષ્કરે તપસા પુરા ।
ધર્મેશં યં સુતં પ્રાપ ધર્મરાજં નમામ્યહમ્ ॥ ૧૩॥

સર્વેષાં પ્રાણિનાં કર્મભોગાન્તં સંવિધાય યઃ ।
શાન્તિં કરોતિ યો દેવઃ શમનાય તુ તે નમઃ ॥ ૧૪॥

કૃતાનાં કર્મણાં ત્વન્તં ન્યાયરીત્યા કરોતિ યઃ ।
સર્વેષાં દેહિનાં સોઽયં તં કૃતાન્તં નમામ્યહમ્ ॥ ૧૫॥

પાપિનાં દણ્ડકર્તા યો દણ્ડં બિભર્તિ શુદ્ધિદમ્ ।
શાસ્ત્રે તસ્મૈ નીતિયુજે દણ્ડિને તે નમો નમઃ ॥ ૧૬॥

સર્વેષાં વસ્તુકાર્યાણાં પરિચ્છેદં કરોતિ યઃ ।
સર્વાયુઃકલનં દેવં કાલરૂપં નમામ્યહમ્ ॥ ૧૭॥

જીવાન્ દણ્ડપ્રદાનૈર્યો યમયત્યેવ સર્વથા ।
કર્માનુરૂપફલદસ્તં યમં પ્રણમામિ વૈ ॥ ૧૮॥

યથા કર્મ તથા દાતા ન રાગાન્ન ચ રોષતઃ ।
તસ્માચ્છુદ્ધિકરં મિત્રં સર્વમિત્રં નમામ્યહમ્ ॥ ૧૯॥

કૃષ્ણનારાયણમૂર્તેઃ સમુત્પન્નસ્તુ યઃ પુરા ।
બ્રહ્મણોંઽશસ્તતો જાતસ્તં બ્રાહ્મં પ્રણમામિ ચ ॥ ૨૦॥

ઇત્યુક્ત્વા તં પ્રણનામ યમસ્તુષ્ટો બભૂવ હ ।
યમાષ્ટકં પઠતસ્તુ ભવેન્નૈવ યમાદ્ભયમ્ ॥ ૨૧॥

કાયવ્યૂહેન ચ શુદ્ધિઃ કર્મણાં તસ્ય જાયતે ।
મુચ્યતે યમપાશાચ્ચ સતીં પ્રાહેતિ ધર્મરાટ્ ॥ ૨૨॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૩૭૦-અધ્યાયાન્તર્ગતં
સાવિત્રીકૃતં યમાષ્ટકં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૩૭૦/૧૨-૨૨॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 370/12-22..

Proofread by PSA Easwaran

*Savitrikritam Yama Ashtakam*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*